# ॥ पूर्ण आनन्द लहरि ॥



पुष्पः - १३ JUL 2025- AUG 2025 दळं - ८

न गुरोरधिकं न गुरोरधिकं न गुरोरधिकं न गुरोरधिकं ।
न गुरोरधिकं न गुरोरधिकं न गुरोरधिकं न गुरोरधिकं ॥



தெளிவு குருவின் திருமேனி காண்டல்
தெளிவு குருவின் திருநாமம் செப்பல்
தெளிவு குருவின் திருவார்த்தை கேட்டல்
தெளிவு குருவுரு சிந்தித்தல் தானே !



॥ श्री विश्वकर्म श्री पादुकां पुजयामि नमः ॥

# विषयानुक्रमणिका


| # | Topics | Page |
|---|---|---|
| 1 | Introduction | 5 |
| 2 | shrI brahmaNAspati – vishvebhyo mantra japa kramaH | 7 |
| 3 | shrI brahmaNAspati – vishvebhyo AvaraNa pUjA kramaH | 11 |
| 4 | shrI vishvakarmabrahma – mantra japa kramaH | 22 |
| 5 | shrI rigvedIya vishvakarma suktaM | 27 |
| 6 | shrI vishvakarmabrahma – AvaraNa pUjA kramaH | 29 |
| 7 | shrI vishvakarma aShTottarashatanAma Stotram | 40 |
| 8 | shrI vishvakarma kavacaM | 42 |
| | | |


पूर्ण आनन्द

॥ शिवादि श्रीगुरुभ्यो नमः ॥

# Introduction

We started providing the mantra japa and AvaraNa pUjA vidhAnaM for every rik from the RigvEdOkta brahmaNaspati suktaM. The famous gaNAnAMtva rik is part of this sUktaM. The potency is of this sUktaM has been explained and experienced by various RisHIs in multiple shAstrAs. One of the ganEsha tantra literature has provided AvaraNa vidhAnaM for each of the Rik mantrAs of this brahmaNaspati sUktaM. In this issue we have given the 17th rik mantra and the vidhanam of the gaNAnAM tvA pancAdi.

In addition, due to readers requests, we have included vishvakarma vidhAnaM in this issue. The mantra japa, shoDasha upacAra pUjA for saguna pUjA, AvaraNa pUjA krama, kavacaM, aShTottarashatanAma stotraM, and the famous vishvakarma suktaM from Rigveda. Vishvakarma pUjA and vratas have been there since the vedic days and is becoming popular in the North India during the recent years. I hope that this vidhanaM can be helpful for the vishvakarma sadhAkAs and to follow and practice.

We hope this issue will be a valuable addition to your spiritual literature collections.

Lalitai vedam sarvam.

Surrendering to the holy pAdukAs of shrIguru

**प्रकाशाम्बा समेत प्रकाशानन्दनाथ**



॥ श्री ब्रह्मणस्पति श्री पादुकां पुजयामि नमः ॥

# श्री विश्वेभ्यो महामन्त्र जप क्रमः

अस्य विश्वेभ्यो इति मन्त्रस्य ।
भार्गव शौनक ऋषिः । जगती छन्दः । सत्य ब्रह्मणस्पतिर्देवता ।
विश्वेभ्यो हि त्वा बीजं । भुवनेभ्यस्परि शक्तिः । ब्रह्मणस्पति कीलकं ।
श्री सत्य ब्रह्मणस्पति महामन्त्र प्रसाद सिद्ध्यर्थे जपे विनियोगः ।

**करन्यासः -**

ग्लां अङ्गुष्ठाभ्यां नमः ।
ग्लीं तर्जनीभ्यां नमः ।
ग्लूं मध्यमाभ्यां नमः ।
ग्लैं अनामिकाभ्यां नमः ।
ग्लौं कनिष्ठिकाभ्यां नमः ।
ग्लः करतलकरपृष्ठाभ्यां नमः ।

**अङ्गन्यासः -**

ग्लां हृदयाय नमः ।
ग्लीं शिरसे स्वाहा ।
ग्लूं शिखायै वषट् ।
ग्लैं कवचाय हूं ।
ग्लौं नेत्रत्रयाय वौषट् ।
ग्लः अस्त्राय फट् ।

ॐ भूर्भुवस्वरों इति दिग्बन्धः ।

श्री आनन्द लहरि

**ध्यानम् -**

सिन्दूरारुणविग्रहं स्वरदनं पाशाङ्कुशौमालिकां
        बिभ्राणं निजबाहुभिर्गजमुखं सर्पोदराबन्धनम् ।
मुक्तादामयुतं च सत्यगणपं ब्रह्मात्मजं भावये
        देवं सत्यसरस्वतीसहितया श्री सत्यलक्ष्म्यायुतम् ॥

**पञ्चपूजा -**

लं पृथिव्यात्मने गन्धं कल्पयामि ।
हं आकाशात्मने पुष्पाणि कल्पयामि ।
यं वाय्वात्मने धूपं कल्पयामि ।
रं अग्न्यात्मने दीपं कल्पयामि ।
वं अमृतात्मने अमृतं महानैवेद्यं कल्पयामि ।
सं सर्वात्मने समस्तोपचार पूजान् कल्पयामि ।

**मूलमन्त्रः**

विश्वे॑भ्यो॒ हि त्वा॒ भुव॑नेभ्य॒स्परि॒ त्वष्टाज॑न॒त्साम्नः॑साम्नः क॒विः ।
स ऋ॑ण॒चिदृ॑ण॒या ब्रह्म॑ण॒स्पति॑र्द्रु॒हो ह॒न्ता म॒ह ऋ॒तस्य॑ ध॒र्तरि॑ ॥

**अङ्गन्यासः -**

ग्लां हृदयाय नमः ।
ग्लीं शिरसे स्वाहा ।
ग्लूं शिखायै वषट् ।
ग्लैं कवचाय हूं ।
ग्लौं नेत्रत्रयाय वौषट् ।

ग्लः अस्त्राय फट् ।

ॐ भूर्भुवस्वरों इति दिग्विमोघः ।

**ध्यानम् -**

सिन्दूरारुणविग्रहं स्वरदनं पाशाङ्कुशौमालिकां
बिभ्राणं निजबाहुभिर्गजमुखं सर्पोदराबन्धनम् ।
मुक्तादामयुतं च सत्यगणपं ब्रह्मात्मजं भावये
देवं सत्यसरस्वतीसहितया श्री सत्यलक्ष्म्यायुतम् ॥

**पञ्चपूजा**

लं पृथिव्यात्मने गन्धं कल्पयामि ।
हं आकाशात्मने पुष्पाणि कल्पयामि ।
यं वाय्वात्मने धूपं कल्पयामि ।
रं अग्न्यात्मने दीपं कल्पयामि ।
वं अमृतात्मने अमृतं महानैवेद्यं कल्पयामि ।
सं सर्वात्मने समस्तोपचार पूजान् कल्पयामि ।



॥ श्री ब्रह्मणस्पति श्रीपादुकां पुजयामि नमः ॥

# श्री विश्वेभ्यो ब्रह्मणस्पति आवरण पूजा क्रमः

**पीठपूजा –**

ओं श्रीं ह्रीं गं मण्डूकादि परतत्त्वाय नमः ।

ओं श्रीं ह्रीं गं तीव्रायै नमः ।
ओं श्रीं ह्रीं गं ज्वालिन्यै नमः ।
ओं श्रीं ह्रीं गं नन्दायै नमः ।
ओं श्रीं ह्रीं गं भोगदायै नमः ।
ओं श्रीं ह्रीं गं कामरूपिण्यै नमः ।
ओं श्रीं ह्रीं गं उग्रायै नमः ।
ओं श्रीं ह्रीं गं तेजोवत्यै नमः ।
ओं श्रीं ह्रीं गं सत्यायै नमः ।
ओं श्रीं ह्रीं गं विघ्ननाशिन्यै नमः ।

ओं श्रीं ह्रीं गं सर्वशक्तिकमलासनायै नमः ।

**श्री ब्रह्मणस्पति ध्यानं –**

सिन्दूरारुणविग्रहं स्वरदनं पाशाङ्कुशौमालिकां
बिभ्राणं निजबाहुभिर्गजमुखं सर्पोदराबन्धनम् ।
मुक्तादामयुतं च सत्यगणपं ब्रह्मात्मजं भावये
देवं सत्यसरस्वतीसहितया श्री सत्यलक्ष्म्यायुतम् ॥

विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरि ॥ श्री ब्रह्मणस्पतिं ध्यायामि आवाहयामि नमः। आवाहनादि मुद्रां प्रदर्श्य ।

विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरि ॥ श्री ब्रह्मणस्पति स्थापिता भव । स्थापण मुद्रां प्रदर्श्य ।
विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरि ॥ श्री ब्रह्मणस्पति संस्थितो भव । संस्थित मुद्रां प्रदर्श्य ।
विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरि ॥ श्री ब्रह्मणस्पति सन्निरुद्धो भव । सनिरुद्ध मुद्रां प्रदर्श्य ।
विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरि ॥ श्री ब्रह्मणस्पति सम्मुखी भव । सम्मुखी मुद्रां प्रदर्श्य ।
विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरि ॥ श्री ब्रह्मणस्पति अवकुण्ठितो भव। अवकुण्ठन मुद्रां प्रदर्श्य ।
विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरि ॥ श्री ब्रह्मणस्पति श्री पादुकां पूजयामि नमः। वन्दन धेनु योनि मुद्राञ्श्च प्रदर्श्य ।

ॐ जय जय जगन्नाथ यावत् पूजावसानकम् ।
तावत् त्वं प्रीति भावेन चक्रेस्मिन् सन्निधिं कुरु ॥

विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिद्दणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरि ॥ श्री ब्रह्मणस्पतये नमः । आसनं कल्पयामि नमः ।

विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिद्दणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरि ॥ श्री ब्रह्मणस्पतये नमः । पादयोः पाद्यं कल्पयामि नमः ।

विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिद्दणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरि ॥ श्री ब्रह्मणस्पतये नमः । हस्तयोः अर्घ्यं कल्पयामि नमः ।

विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिद्दणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरि ॥ श्री ब्रह्मणस्पतये नमः । मुखे आचमनीयं कल्पयामि नमः ।

विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिद्दणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरि ॥ श्री ब्रह्मणस्पतये नमः । शुद्धोदक स्नानं कल्पयामि नमः । अनन्तरं आचमनीयं कल्पयामि नमः ।

विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिद्दणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरि ॥ श्री ब्रह्मणस्पतये नमः । वस्त्राणि कल्पयामि नमः ।

विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिद्दणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरि ॥ श्री ब्रह्मणस्पतये नमः । आभरणनि कल्पयामि नमः ।

विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरिं ॥ श्री ब्रह्मणस्पतये नमः।
दिव्यपरिमल गन्धं कल्पयामि नमः।
विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरिं ॥ श्री ब्रह्मणस्पतये नमः।
गन्धस्योऽपरि हरिद्रा कुङ्कुमं कल्पयामि नमः।
विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरिं ॥ श्री ब्रह्मणस्पतये नमः।
पुष्पाक्षतान् कल्पयामि नमः।
विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरिं ॥ श्री ब्रह्मणस्पतये नमः। धूपं कल्पयामि नमः।
विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरिं ॥ श्री ब्रह्मणस्पतये नमः। दीपं कल्पयामि नमः।
विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरिं ॥ श्री ब्रह्मणस्पतये नमः। नैवेद्यं कल्पयामि नमः।
विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरिं ॥ श्री ब्रह्मणस्पतये नमः।
अमृतपानीयं कल्पयामि नमः।
विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरिं ॥ श्री ब्रह्मणस्पतये नमः। सुगन्ध ताम्बूलं कल्पयामि नमः।

विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिद्दणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरि ॥ श्री ब्रह्मणस्पतये नमः। कर्पूर नीराञ्जनं कल्पयामि नमः।

विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिद्दणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरि ॥ श्री ब्रह्मणस्पतये नमः। प्रदक्षिण नमस्कारान् कल्पयामि नमः।

ॐ संविन्मये परे देवि परामृत रुचि प्रिये ।
अनुज्ञां ब्रह्मणस्पतिं देहि परिवारार्चनाय मे ॥

## षडङ्ग तर्पणम् –

ग्लां हृदयाय नमः । हृदय शक्ती श्री पादुकां पूजायामि तर्पयामि नमः ।
ग्लीं शिरसे स्वाहा । शिरो शक्ती श्री पादुकां पूजायामि तर्पयामि नमः ।
ग्लूं शिखायै वषट् । शिखा शक्ती श्री पादुकां पूजायामि तर्पयामि नमः ।
ग्लैं कवचाय हूं । कवच शक्ती श्री पादुकां पूजायामि तर्पयामि नमः ।
ग्लौं नेत्रत्रयाय वौषट् ।नेत्र शक्ती श्री पादुकां पूजायामि तर्पयामि नमः ।
ग्लः अस्त्राय फट् ।अस्त्र शक्ती श्री पादुकां पूजायामि तर्पयामि नमः ।

## लयाङ्ग तर्पणम् -

विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिद्दणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरि ॥ श्री ब्रह्मणस्पति श्री पादुकां पूजयामि तर्पयामि नमः। (१० वारं)

## प्रथमावरणम् - बिन्दौ

ब्रह्मणस्पतये नमः । ब्रह्मणस्पति श्री पादुकां पूजयामि तर्पयामि नमः ।
सिद्ध्यै नमः । सिद्धी श्री पादुकां पूजयामि तर्पयामि नमः ।
बुद्ध्यै नमः । बुद्धी श्री पादुकां पूजयामि तर्पयामि नमः ।

ॐ एताः प्रथमावरण देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः सन्तर्पिताः सन्तुष्टाः सन्तु नमः ।

विश्वे॑भ्यो॒ हि त्वा॒ भुव॑नेभ्य॒स्परि॒ त्वष्टाज॑न॒त्साम्नः॑साम्नः क॒विः ।
स ऋ॑ण॒चिदृ॑ण॒या ब्रह्म॑ण॒स्पति॑र्द्रु॒हो ह॒न्ता म॒ह ऋ॒तस्य॑ ध॒र्तरि॑ ॥ श्री ब्रह्मणस्पति श्री पादुकां पूजयामि तर्पयामि नमः। (३ वारं)

ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

अनेन प्रथमावरणार्चनेन भगवति सर्वदेवात्मक श्री ब्रह्मणस्पति प्रीयथाम् । (योनि मुद्रया प्रणमेत् ।)

## द्वितीयावरणम् – त्रिकोणे

ब्रह्माय नमः नमः । ब्रह्म श्री पादुकां पूजयामि तर्पयामि नमः ।
गायत्र्यै नमः । गायत्री श्री पादुकां पूजयामि तर्पयामि नमः ।
सावित्र्यै नमः । सावित्री श्री पादुकां पूजयामि तर्पयामि नमः ।
सरस्वत्यै नमः । सरस्वती श्री पादुकां पूजयामि तर्पयामि नमः ।

ॐ एताः द्वितीयावरण देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः सन्तर्पिताः सन्तुष्टाः सन्तु नमः ।

विश्वे॑भ्यो॒ हि त्वा॒ भुव॑नेभ्य॒स्परि॒ त्वष्टाज॑न॒त्साम्न॑:साम्नः क॒विः ।
स ऋ॑ण॒चिदृ॑ण॒या ब्रह्म॑ण॒स्पति॑र्द्रु॒हो ह॒न्ता म॒ह ऋ॒तस्य॑ ध॒र्तरि॑ ॥ श्री ब्रह्मणस्पति श्री पादुकां पूजयामि तर्पयामि नमः। (३ वारं)

ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम् ॥

अनेन द्वितीयावरणार्चनेन भगवति सर्वदेवात्मक श्री ब्रह्मणस्पति प्रीयथाम् । (योनि मुद्रया प्रणमेत् ।)

## तृतीयावरणम् - षट्कोणे

मोदाय नमः । मोद श्री पादुकां पूजयामि तर्पयामि नमः ।
प्रमोदाय नमः । प्रमोद श्री पादुकां पूजयामि तर्पयामि नमः ।
सुमुखाय नमः । सुमुख श्री पादुकां पूजयामि तर्पयामि नमः ।
दुर्मुखाय नमः । दुर्मुख श्री पादुकां पूजयामि तर्पयामि नमः ।
अविघ्नाय नमः । अविघ्न श्री पादुकां पूजयामि तर्पयामि नमः ।
विघ्नकर्ते नमः । विघ्नकर्तृ श्री पादुकां पूजयामि तर्पयामि नमः ।

ॐ एताः तृतीयावरण देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः सन्तर्पिताः सन्तुष्टाः सन्तु नमः ।

विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः । स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरि ॥ श्री ब्रह्मणस्पति श्री पादुकां पूजयामि तर्पयामि नमः। (३ वारं)

ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनम् ॥

अनेन तृतीयावरणार्चनेन भगवति सर्वदेवात्मक श्री ब्रह्मणस्पति प्रीयथाम् । (योनि मुद्रया प्रणमेत् ।)

## तुरियावरणम् – अष्टदले

दक्षाय नमः । दक्ष श्री पादुकां पूजयामि तर्पयामि नमः ।
मरीचये नमः । मरीचि श्री पादुकां पूजयामि तर्पयामि नमः ।
आङ्गीरसे नमः । आङ्गीरस श्री पादुकां पूजयामि तर्पयामि नमः ।
अत्रये नमः । अत्रि श्री पादुकां पूजयामि तर्पयामि नमः ।
पुलस्त्याय नमः । पुलस्त्य श्री पादुकां पूजयामि तर्पयामि नमः ।
पुलहाय नमः । पुलह श्री पादुकां पूजयामि तर्पयामि नमः ।
कृतवे नमः । कृतु श्री पादुकां पूजयामि तर्पयामि नमः ।
वशिष्ठाय नमः । वशिष्ठ श्री पादुकां पूजयामि तर्पयामि नमः ।

ॐ एताः तुरियावरण देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः सन्तर्पिताः सन्तुष्टाः सन्तु नमः ।

विश्वे॑भ्यो॒ हि त्वा॒ भुव॑नेभ्य॒स्परि॒ त्वष्टाज॑न॒त्साम्न॑ःसाम्नः क॒विः ।
स ऋ॑ण॒चिदृ॑ण॒या ब्रह्म॑ण॒स्पति॑र्द्रु॒हो ह॒न्ता म॒ह ऋ॒तस्य॑ ध॒र्तरि॑ ॥ श्री ब्रह्मणस्पति श्री पादुकां पूजयामि तर्पयामि नमः। (३ वारं)

ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं तुरियावरणार्चनम् ॥

अनेन तुरियावरणार्चनेन भगवति सर्वदेवात्मक श्री ब्रह्मणस्पति प्रीयथाम् । (योनि मुद्रया प्रणमेत् ।)

## पञ्चमावरणम् – भूपुरे

लां इन्द्राय वज्रहस्ताय सुराधिपतये ऐरावत वाहनाय सपरिवाराय नमः । इन्द्र श्री पादुकां पूजयामि तर्पयामि नमः ।
रां अग्नये शक्तिहस्ताय तेजोधिपतये अज वाहनाय सपरिवाराय नमः । अग्नि श्री पादुकां पूजयामि तर्पयामि नमः ।
टां यमाय दण्डहस्ताय प्रेताधिपतये महिष वाहनाय सपरिवाराय नमः । यम श्री पादुकां पूजयामि तर्पयामि नमः ।
क्षां नैरृतये खड्गहस्ताय रक्षाधिपतये नर वाहनाय सपरिवाराय नमः । निरृति श्री पादुकां पूजयामि तर्पयामि नमः ।
वां वरुणाय पाशहस्ताय जलाधिपतये मकर वाहनाय सपरिवाराय नमः । वरुण श्री पादुकां पूजयामि तर्पयामि नमः ।


यां वायवे ध्वजहस्ताय प्राणाधिपतये रुरु वाहनाय सपरिवाराय नमः । वायु श्री पादुकां पूजयामि तर्पयामि नमः ।
सां सोमाय शङ्खहस्ताय नक्षत्राधिपतये अश्व वाहनाय सपरिवाराय नमः । सोम श्री पादुकां पूजयामि तर्पयामि नमः ।
हौं ईशानाय त्रिशूलहस्ताय विद्याधिपतये वृषभ वाहनाय सपरिवाराय नमः । ईशान श्री पादुकां पूजयामि तर्पयामि नमः ।

ॐ एताः पञ्चमावरण देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः सन्तर्पिताः सन्तुष्टाः सन्तु नमः ।

विश्वे॑भ्यो॒ हि त्वा॒ भुव॑नेभ्य॒स्परि॒ त्वष्टाज॑न॒त्साम्न॑:साम्नः क॒विः ।
स ऋ॑ण॒चिदृ॑ण॒या ब्रह्म॑ण॒स्पति॑र्द्रु॒हो ह॒न्ता म॒ह ऋ॒तस्य॑ ध॒र्तरि॑ ॥ श्री ब्रह्मणस्पति श्री पादुकां पूजयामि तर्पयामि नमः। (३ वारं)

ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं पञ्चमावरणार्चनम् ॥

अनेन पञ्चमावरणार्चनेन भगवति सर्वदेवात्मक श्री ब्रह्मणस्पति प्रीयथाम् । (योनि मुद्रया प्रणमेत् ।)




॥ श्री विश्वकर्म श्री पादुकां पुजयामि नमः ॥

# श्री विश्वकर्म ब्रह्म महामन्त्र जप क्रमः

अस्य श्री विश्वकर्म ब्रह्म महामन्त्रस्य ।
परब्रह्म ऋषिः । गायत्री छन्दः । श्री विश्वकर्मब्रह्मोदेवता ।
ॐ अं बीजं । ॐ विश्वकर्म ब्रह्म शक्तिः । प्रपञ्चाक्षरं कीलकं ।
श्री विश्वकर्मब्रह्म महामन्त्र प्रसाद सिद्ध्यर्थे जपे विनियोगः ।

**करन्यासः -**

ॐ अं अङ्गुष्ठाभ्यां नमः ।
ॐ क्लीं तर्जनीभ्यां नमः ।
ॐ ह्रीं मध्यमाभ्यां नमः ।
ॐ अं अनामिकाभ्यां नमः ।
ॐ क्लीं कनिष्ठिकाभ्यां नमः ।
ॐ ह्रीं करतलकरपृष्ठाभ्यां नमः ।

**अङ्गन्यासः -**

ॐ अं हृदयाय नमः ।
ॐ क्लीं शिरसे स्वाहा ।
ॐ ह्रीं शिखायै वषट् ।
ॐ अं कवचाय हुं ।
ॐ क्लीं नेत्रत्रयाय वौषट् ।
ॐ ह्रीं अस्त्राय फट् ।

श्री आनन्द लहरि

**पञ्चमुख न्यासः -**

ॐ अं सद्योजात मुखोद्भवाय मनु विश्वब्रह्म सानगात्मने हृदयाय नमः ।

ॐ क्लीं वामदेव मुखोद्भवाय मय विश्वब्रह्म सनातनात्मने शिरसे स्वाहा ।

ॐ ह्रीं अघोर मुखोद्भवाय त्वष्ट्र विश्वब्रह्माहभूनात्मने शिखायै वषट् ।

ॐ ह्रीं तत्पुरुष मुखोध्वाय शिल्पि विश्वब्रह्म प्रत्नात्मने कवचाय हुं ।

ॐ क्लीं ईशान मुखोद्भवाय अर्क विश्वब्रह्म सपूर्णात्मने नेत्रत्रयाय वौषट् ।

ॐ अं सर्व मुखोद्भवाय कश्यप विश्वब्रह्म विरात्स्वरूपिणे अस्त्राय फट् ।

ॐ भूर्भुवस्वरों इति दिग्बन्धः ।

**ध्यानम् -**

सहस्रवदनेद्बाहुः सहस्राक्षः सहस्रपात्

आदिपुरुष ईशान आदिब्रह्मकुलोद्भुव ।

विश्वकर्मसदाध्येयो नीलमेघोपरिस्थितः

सर्वाभरणसंयुक्तो रत्नसिंहासनस्थितः ॥

**पञ्चपूजा -**

लं पृथिव्यात्मने गन्धं कल्पयामि ।

हं आकाशात्मने पुष्पाणि कल्पयामि ।

यं वाय्वात्मने धूपं कल्पयामि ।

रं अग्न्यात्मने दीपं कल्पयामि ।

वं अमृतात्मने अमृतं महानैवेद्यं कल्पयामि ।

सं सर्वात्मने समस्तोपचार पूजान् कल्पयामि ।

**मूलमन्त्रः**

ॐ विश्वकर्मणे नमः । (अष्टक्षरी)
ॐ वं विश्वकर्मणे नमः । (नवाक्षरि)
ॐ अं क्लीं ह्रीं विश्वकर्म ब्रह्मोविशक्तिः सर्वकार्यमेव शंकुस हुं फट् स्वाहा । (षड्विंशत्यक्षरि)
ॐ अं क्लीं ह्रीं विश्वकर्म ब्रह्मादिशक्तिः सर्वकार्यमेव साधय हुं फट् स्वाहा । (षड्विंशत्यक्षरि)
गायत्री -
विराट्रूपाय विद्महे विश्वकर्मणाय धीमहि । तन्नो पाब्रह्मः प्रचोदयात् ॥

**अङ्गन्यासः -**

ॐ अं हृदयाय नमः ।
ॐ क्लीं शिरसे स्वाहा ।
ॐ ह्रीं शिखायै वषट् ।
ॐ अं कवचाय हुं ।
ॐ क्लीं नेत्रत्रयाय वौषट् ।
ॐ ह्रीं अस्त्राय फट् ।

ॐ भूर्भुवस्वरों इति दिग्विमोघः ।

**ध्यानम् -**

सहस्रवदनेद्बाहुः सहस्राक्षः सहस्रपात्
आदिपुरुष ईशान आदिब्रह्मकुलोद्भुव ।
विश्वकर्मसदाध्येयो नीलमेघोपरिस्थितः
सर्वाभरणसंयुक्तो रत्नसिंहासनस्थितः ॥

## पञ्चपूजा

लं पृथिव्यात्मने गन्धं कल्पयामि ।

हं आकाशात्मने पुष्पाणि कल्पयामि ।


यं वाय्वात्मने धूपं कल्पयामि ।

रं अग्न्यात्मने दीपं कल्पयामि ।

वं अमृतात्मने अमृतं महानैवेद्यं कल्पयामि ।

सं सर्वात्मने समस्तोपचार पूजान् कल्पयामि ।

पूर्ण आनन्द लहरि




॥ श्री विश्वकर्म श्रीपादुकां पुजयामि नमः ॥

# ऋग्वेदीय विश्वकर्म सूक्तम्

विश्वकर्म भौवनः ऋषिः । त्रिष्टुप् छन्दः । विश्वकर्मा देवता ।

(ऋग्वेद १०.८१)

य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत्पिता नः ।
स आशिषा द्रविणमिच्छमानः प्रथमच्छदवराँ आ विवेश ॥
किं स्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्कथासीत् ।
यतो भूमिं जनयन्विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः ॥
विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः ॥
किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः ।
मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन् ॥
या ते धामानि परमाणि यावमा या मध्यमा विश्वकर्मन्नुतेमा ।
शिक्षा सखिभ्यो हविषि स्वधावः स्वयं यजस्व तन्वं वृधानः ॥
विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्याम् ।
मुह्यन्त्वन्ये अभितो जनास इहास्माकं मघवा सूरिरस्तु ॥
वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे अद्या हुवेम ।
स नो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्मा ॥

(ऋग्वेद १०.८२)

चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नम्नमाने ।
यदेदन्ता अददृहन्त पूर्व आदिद्द्यावापृथिवी अप्रथेताम् ॥
विश्वकर्मा विमना आद्विहाया धाता विधाता परमोत संदृक् ।
तेषामिष्टानि समिषा मदन्ति यत्रा सप्तऋषीन्पर एकमाहुः ॥
यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा ।
यो देवानां नामधा एक एव तं संप्रश्नं भुवना यन्त्यन्या ॥
त आयजन्त द्रविणं समस्मा ऋषयः पूर्वे जरितारो न भूना ।
असूर्ते सूर्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि ॥
परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्यदस्ति ।
कं स्विद्गर्भं प्रथमं दध्र आपो यत्र देवाः समपश्यन्त विश्वे ॥
तमिद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे ।
अजस्य नाभावध्येकमर्पितं यस्मिन्विश्वानि भुवनानि तस्थुः ॥
न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव ।
नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति ॥

# श्री विश्वकर्म ब्रह्म आवरण पूजा क्रमः

**पीठपूजा –**

ॐ अं क्लीं ह्रीं मण्डूकादि परतत्त्वाय नमः ।

आधार शक्तये नमः ।

आदिकूर्माय नमः ।

अनन्ताय नमः ।

पृथिव्यै नमः ।

ॐ अं क्लीं ह्रीं सर्वशक्तिकमलासनायै नमः ।

## श्री विश्वकर्म षोडश उपचार पूजा

**श्री विश्वकर्म ब्रह्म ध्यानं –**

सहस्रवदनेद्बाहुः सहस्राक्षः सहस्रपात्
आदिपुरुष ईशान आदिब्रह्मकुलोद्भव ।
विश्वकर्मसदाध्येयो नीलमेघोपरिस्थितः
सर्वाभरणसंयुक्तो रत्नसिंहासनस्थितः ॥

विश्वंकर्मन् हविषा वावृधानः स्वयं यंजस्व पृथिवीमुतद्याम् ।
मुह्यंन्त्वन्ये अभितः सपत्ना इहास्माकं मघावा सूरिरंस्तु ॥

देवशिल्पिन् महाभाग देवानां कार्यसाधक ।
विश्वकर्मन् नमस्तुभ्यं सर्वाभीष्टप्रदायक ॥

नमामि विश्वकर्मणं द्विभुजं विश्ववन्दितम् ।
गृहवास्तु विधातारं महाबलपराक्रमम् ॥
प्रसीद विश्वकर्मस्त्वं शिल्पविद्याविशारद ।
दण्डपाणे नमस्तुभ्यं तेजोमूर्तिधर प्रभो ॥

आवाहयामि देवेशं विश्वकर्मणमीश्वरम् ।
मूर्ताऽमूर्तकरं देवं सर्वकर्त्तारमद्भुतम् ॥
- श्री विश्वकर्मपरब्रह्मणे नमः । ध्यायामि आवाहयामि ।आवाहनादि मुद्रां प्रदर्श्य ।

त्रैलोक्यं सूत्रकर्तारं द्विभुजं विश्वदर्शितम् ।
आगच्छ विश्वकर्मस्त्वं अत्रेऽस्मिन् सन्निधो भव ॥ - श्री विश्वकर्मपरब्रह्मणे नमः। सन्निधो भव।

सुवर्णरचित देवाय दिव्यस्तरण शोभितम् ।
आसनं हि मया दत्त गृहाणाङ्गिरसो सुत ॥ - - श्री विश्वकर्मपरब्रह्मणे नमः । आसनं कल्पयामि ।

इदं पाद्यं मया दत्तं सर्वसौगन्धसंयुतम् ।
गृहीत विश्वकर्मेश प्रसन्नो भव वास्तुज ॥ - श्री विश्वकर्मपरब्रह्मणे नमः । पादयोः पाद्यं कल्पयामि ।

दिव्यौषधिरसोपेत गन्धपुष्पाऽक्षतैः सह ।
गृहाणाऽर्घ्यं मया दत्तं विश्वकर्मन् कृपा कुरु ॥ - श्री विश्वकर्मपरब्रह्मणे नमः । हस्तयोः अर्घ्यं कल्पयामि ।

सुगन्धवासितं दिव्यं निर्मलं सलिलं विभो ।
गृहाणाऽऽचमनं सौम्य विश्वकर्मन् कृपा कुरु ॥ - श्री विश्वकर्मपरब्रह्मणे नमः । मुखे आचमनीयं कल्पयामि ।

नमो देवाय भद्राय गृहनिर्माणशालिने ।
मधुपर्कं गृहाणेदं विश्वकर्मन् सुधोपमम् ॥ - श्री विश्वकर्मपरब्रह्मणे नमः । मधुपर्कं कल्पयामि ।

पञ्चामृतं मया नीतं पयो दधि घृतं मधु ।
शुद्धं शर्करया युक्तं विश्वकर्मन् प्रगृह्यताम् ॥ - श्री विश्वकर्मपरब्रह्मणे नमः । पञ्चामृतं कल्पयामि ।

गङ्गाजलं समानीतं सर्वपापहरं शुभम् ।
पूतं पयोऽथवा दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥ - श्री विश्वकर्मपरब्रह्मणे नमः । स्नानं कल्पयामि ।

विश्वकर्म सूक्तं पठित्वा अभिषेकं कुर्यात् । - श्री विश्वकर्मपरब्रह्मणे नमः । स्नानानन्तरं आचमनीयं कल्पयामि ।

स्वदेशनिर्मितं वस्त्रं नूतनं पावनं परम् ।
शरीरच्छादनार्थाय गृह्यतां सूत्रवर्द्धन ॥ - श्री विश्वकर्मपरब्रह्मणे नमः । वस्त्रं कल्पयामि ।

नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम् ।
उपवीतं मया दत्तं गृह्यतां धर्मनन्दन ॥ - श्री विश्वकर्मपरब्रह्मणे नमः । यज्ञोपवीतं कल्पयामि ।

शिरस्कं कुण्डलं हारं सोत्तरीय तथैव च ।
अलङ्कारं प्रगृह्याऽत्र विश्वकर्मन् प्रसीद मे ॥ - श्री विश्वकर्मपरब्रह्मणे नमः । भूषणादि अलङ्कारान् कल्पयामि ।

श्रीखण्डं चन्दनं दिव्यं गन्धढ्यं सुमनोहरम् ।
विलेपनं सुरश्रेष्ठ गृह्यतां चन्दनं शुभम् ॥ - श्री विश्वकर्मपरब्रह्मणे नमः । दिव्य चन्दनं कल्पयामि ।

अक्षताश्च कलानाथ कुङ्कुमाक्ताः सुशोभिताः ।
मया निवेदिता भक्त्या गृहाण वास्तुनन्दन ॥ - श्री विश्वकर्मपरब्रह्मणे नमः । मङ्गलाक्षतैः कल्पयामि ।

मल्लिकादि सुगन्धीनि माल्यादीनि चवै प्रभो ।
मयाहृदानि पूजार्थं पुष्पाणिप्रतिगृह्यताम् ॥
सौरभानि सुमाल्यानि सुपुष्परचितानि वै ।
मया निवेदितान्यत्र शिल्पाचार्य सुगृह्यतम् ॥ - श्री विश्वकर्मपरब्रह्मणे नमः । पुष्पमालां कल्पयामि ।

वनस्पति रसोद्भूतं सुगन्धाढ्यं मनोहरम् ।
धूपं गृहाण कर्मेश द्रुतकर्मपरायण ॥ - श्री विश्वकर्मपरब्रह्मणे नमः । धूपं कल्पयामि ।

घृतवर्तीसमायुक्तं कर्पूरादिसमन्वितम् ।
दीपं गृहाण देवेश ह्यन्धकार विनाशनम् ॥ - श्री विश्वकर्मपरब्रह्मणे नमः। दीपं कल्पयामि ।

पूपमोदकसंयावपयःपक्वादिकं वरम् ।
निर्मितं बहुसत्कारैर्नैवेद्यं प्रतिगृह्यताम् ॥ - श्री विश्वकर्मपरब्रह्मणे नमः । नैवेद्यं कल्पयामि ।

शीतलं स्वादुः गाङ्गेयं तृषातृप्तिकरं जलम् ।
सर्वदेवतृप्त्यर्थं विश्वकर्मन् प्रगृह्यताम् ॥ - श्री विश्वकर्मपरब्रह्मणे नमः । आचमनीयं कल्पयामि ।

इदं फलं मया देव स्थापितं पुरतस्तव ।
तेन मे सफलवाप्ति जन्मजन्मादि जन्मनि ॥ - श्री विश्वकर्मपरब्रह्मणे नमः। फलं कल्पयामि ।

ताम्बूलं पूगसंयुक्तं चूर्णं खादिरसंयुतम् ।
लवङ्गादियुतं देव गृह्यतां ब्रह्मवंशज ॥ - श्री विश्वकर्मपरब्रह्मणे नमः । ताम्बूलं कल्पयामि ।

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ - श्री विश्वकर्मपरब्रह्मणे नमः । स्वर्ण दक्षिणन् कल्पयामि ।

कर्पूरवर्तिसंयुक्तं गोघृतेन सुपूरितम् ।
नीराञ्जनं गृहाणेदं कृपया सौख्यवर्द्धन ॥ - श्री विश्वकर्मपरब्रह्मणे नमः । कर्पूर नीराञ्जनं कल्पयामि ।

## आवरण पूजा

ॐ जय जय जगन्नाथ यावत् पूजावसानकम् ।
तावत् त्वं प्रीति भावेन चक्रेस्मिन् सन्निधिं कुरु ॥

ॐ संविन्मये परे देव परामृत रुचि प्रिये ।
अनुज्ञां विश्वकर्मा देहि परिवारार्चनाय मे ॥

### षडङ्ग तर्पणम् –

ॐ अं हृदयाय नमः । हृदय शक्ती श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ क्लीं शिरसे स्वाहा । शिरो शक्ती श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ ह्रीं शिखायै वषट् । शिखा शक्ती श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ अं कवचाय हुं । कवच शक्ती श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ क्लीं नेत्रत्रयाय वौषट् । नेत्र शक्ती श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ ह्रीं अस्त्राय फट् । अस्त्र शक्ती श्री पादुकां पूजयामि तर्पयामि नमः ।

**लयाङ्ग तर्पणम् -**

ॐ अं क्लीं ह्रीं विश्वकर्म ब्रह्मादिशक्तिः सर्वकार्यमेव साधय हुं फट् स्वाहा । श्री विश्वकर्मपरब्रह्म श्री पादुकां पूजयामि तर्पयामि नमः । (१० वारं)

**प्रथमावरणम्** - बिन्दौ

ॐ अं क्लीं ह्रीं विश्वकर्म ब्रह्मादिशक्तिः सर्वकार्यमेव साधय हुं फट् स्वाहा । श्री विश्वकर्मपरब्रह्म श्री पादुकां पूजयामि तर्पयामि नमः ।

ॐ एताः प्रथमावरण देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः सन्तर्पिताः सन्तुष्टाः सन्तु नमः ।

ॐ अं क्लीं ह्रीं विश्वकर्म ब्रह्मादिशक्तिः सर्वकार्यमेव साधय हुं फट् स्वाहा । श्री विश्वकर्मपरब्रह्म श्री पादुकां पूजयामि तर्पयामि नमः । (३ वारं)

ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

अनेन प्रथमावरणार्चनेन भगवति सर्वदेवात्मक श्री विश्वकर्मपरब्रह्म प्रीयथाम् । (योनि मुद्रया प्रणमेत् ।)

**द्वितीयावरणम् -** त्रिकोणे

ॐ अं क्लीं ह्रीं सानगाय नमः । सानग श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ अं क्लीं ह्रीं सनातनाय नमः । सनातन श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ अं क्लीं ह्रीं अहभूनाय नमः । अहभून श्री पादुकां पूजयामि तर्पयामि नमः ।

ॐ अं क्लीं ह्रीं प्रत्नाय नमः । प्रत्न श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ अं क्लीं ह्रीं सुपर्णाय नमः । सुपर्ण श्री पादुकां पूजयामि तर्पयामि नमः ।

ॐ एताः द्वितीयावरण देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः सन्तर्पिताः सन्तुष्टाः सन्तु नमः ।

ॐ अं क्लीं ह्रीं विश्वकर्म ब्रह्मादिशक्तिः सर्वकार्यमेव साधय हुं फट् स्वाहा । श्री विश्वकर्मपरब्रह्म श्री पादुकां पूजयामि तर्पयामि नमः । (३ वारं)

ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम् ॥

अनेन द्वितीयावरणार्चनेन भगवति सर्वदेवात्मक श्री विश्वकर्मपरब्रह्म प्रीयथाम् । (योनि मुद्रया प्रणमेत् ।)

## तृतीयावरणम् – षट्कोणे

ॐ अं हृदयाय नमः । हृदय शक्ती श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ क्लीं शिरसे स्वाहा । शिरो शक्ती श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ ह्रीं शिखायै वषट् । शिखा शक्ती श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ अं कवचाय हुं । कवच शक्ती श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ क्लीं नेत्रत्रयाय वौषट् । नेत्र शक्ती श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ ह्रीं अस्त्राय फट् । अस्त्र शक्ती श्री पादुकां पूजयामि तर्पयामि नमः ।

ॐ एताः तृतीयावरण देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः सन्तर्पिताः सन्तुष्टाः सन्तु नमः ।

ॐ अं क्लीं ह्रीं विश्वकर्म ब्रह्मादिशक्तिः सर्वकार्यमेव साधय हुं फट् स्वाहा । श्री विश्वकर्मपरब्रह्म श्री पादुकां पूजयामि तर्पयामि नमः । (३ वारं)

ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनम् ॥

अनेन तृतीयावरणार्चनेन भगवति सर्वदेवात्मक श्री विश्वकर्मपरब्रह्म प्रीयथाम् । (योनि मुद्रया प्रणमेत् ।)

## तुरियावरणम् - अष्टदले

ॐ अं क्लीं ह्रीं आं ब्राह्म्यै नमः । ब्राह्मी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ अं क्लीं ह्रीं ईं माहेश्वर्यै नमः । माहेश्वरी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ अं क्लीं ह्रीं ऊं कौमार्यै नमः । कौमारी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ अं क्लीं ह्रीं ॠं वैष्णव्यै नमः । वैष्णवी श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ अं क्लीं ह्रीं ॡं वाराह्यै नमः । वाराही श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ अं क्लीं ह्रीं ऐं माहेन्द्र्यै नमः । माहेन्द्री श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ अं क्लीं ह्रीं औं चामुण्डाये नमः । चामुण्डा श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ अं क्लीं ह्रीं अः महालक्ष्म्यै नमः । महालक्ष्मी श्री पादुकां पूजयामि तर्पयामि नमः ।

ॐ एताः तुरियावरण देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः सन्तर्पिताः सन्तुष्टाः सन्तु नमः ।

ॐ अं क्लीं ह्रीं विश्वकर्म ब्रह्मादिशक्तिः सर्वकार्यमेव साधय हुं फट् स्वाहा । श्री विश्वकर्मपरब्रह्म श्री पादुकां पूजयामि तर्पयामि नमः । (३ वारं)

ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं तुरियावरणार्चनम् ॥

अनेन तुरियावरणार्चनेन भगवति सर्वदेवात्मक श्री विश्वकर्मपरब्रह्म प्रीयथाम् । (योनि मुद्रया प्रणमेत् ।)

## पञ्चमावरणम् - भूपुरे

ॐ अं क्लीं ह्रीं लां इन्द्राय नमः । इन्द्र श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ अं क्लीं ह्रीं रां अग्नये नमः । अग्नि श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ अं क्लीं ह्रीं टां यमाय नमः । यम श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ अं क्लीं ह्रीं क्षां निरृतये नमः । निरृति श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ अं क्लीं ह्रीं वां वरुणाय नमः । वरुण श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ अं क्लीं ह्रीं यां वायवे नमः । वायु श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ अं क्लीं ह्रीं सां सोमाय नमः । सोम श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ अं क्लीं ह्रीं हौं ईशानय नमः । ईशान श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ अं क्लीं ह्रीं आं ब्रह्मणे नमः । ब्रह्म श्री पादुकां पूजयामि तर्पयामि नमः ।
ॐ अं क्लीं ह्रीं ह्रीं अनन्ताय नमः । अनन्त श्री पादुकां पूजयामि तर्पयामि नमः ।

ॐ एताः पञ्चमावरण देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः सन्तर्पिताः सन्तुष्टाः सन्तु नमः ।

ॐ अं क्लीं ह्रीं विश्वकर्म ब्रह्मादिशक्तिः सर्वकार्यमेव साधय हुं फट् स्वाहा । श्री विश्वकर्मपरब्रह्म श्री पादुकां पूजयामि तर्पयामि नमः । (३ वारं)

ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं पञ्चमावरणार्चनम् ॥

अनेन पञ्चमावरणार्चनेन भगवति सर्वदेवात्मक श्री विश्वकर्मपरब्रह्म प्रीयथाम् । (योनि मुद्रया प्रणमेत् ।)

# विश्वकर्म अष्टोत्तर शत नाम स्तोत्रम्

अस्य श्री विश्वकर्मा अष्टोत्तरशतनाम स्तोत्र महामन्त्रस्य ।
ब्रह्मा ऋषिः । अनुष्टुप् छन्दः । श्री विश्वकर्मा देवता ॥
सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः ॥

ध्यानम् -

पञ्चाननो दशभुजा घृतवद दीक्षः केयूरहारमणिकुण्डलचण्डतेजः ।
भस्माङ्कितोमणि नयासन संस्थितोऽसो सर्वेश्वरोवसतुमेहृदि विश्वकर्मा ॥

श्लोकः

विश्वकर्मामनुसतवष्टास्थाष्ठिस्थविरोध्रुवः ।
विष्णवेश्वनरो योगी शिल्पाचार्यः क्रियपरः ॥

अमयी निर्भयः शान्तः सत्यव्यामः सतांप्रियः ।
लोकाध्यक्षः सुराध्यक्षो वरदोऽभयदोवरः ॥

मयोमन्द्रः महातेजाः शिवयोगी हरिप्रियः ।
कायदः शयदः कान्तः कुलीन कौशल प्रदः ॥

दातासत्यः स्वराद्विभज्ञे गृहस्थाश्रमिणोमतिः ।
वनवासी महामायो रूपाध्यक्षो ह्यचिन्तितः ॥

स्वापनः शाघ्र सोचिन्त्यः कौशल कर्मठोनरः ।
जटीमुण्डी शिखीदेवः संवृत्ताङ्ग पिशाचराट् ॥

शास्त्रविधिर्विधिकरो लोकेशः पावनः परः ।
हरोबुद्धि प्रदोऽनंतः सत्यसङ्कल्प ईश्वरः ॥

सत्यकामः सत्यरूचिः सत्यार्थः शंभवः शिवः ।
नादप्रियोबोधकर्ता करणा श्रीः आयुधप्रियः ॥

घना खङ्गी ध्वजी वर्मी शूली चक्री कपालभृत् ।
अजरो प्रणवो व्यक्तोऽव्यक्तः कृष्णोयजुर्हविः ॥

यज्ञयज्ञो महान्स्पष्टः सोयी साम्राङ्गवोभवः ।
नाथशिल्पीकविः शूरोमुनिमौनी दिगम्बरः ॥

सर्वायुधिः सर्वसहः सर्वकृत्शङ्करप्रभुः ।
इत्याष्टशतसंख्याभिनामभिः संसक्तोमयः ॥

इत्यष्टशतनामेदं यः पठेन्नित्यशोनरः ।
सोर्थी यशः समाप्नोति श्रेयः सकलसंपदः ॥

# विश्वकर्म कवचम्

ब्रह्म उवाच -
देव देव महादेव भक्तानुग्रहकारक ।
सुचितैकमनो ब्रह्म कवचं कथयस्व मे ॥

ईश्वर उवाच -
अथातः संप्रवक्ष्यामि कवचमेव दुर्लभम् ।
अप्रकाश्यपरंगुह्यं सर्वाभीष्टस्य सिद्धितम् ॥

विश्वकर्माख्य कवचं श्रृणुष्व चतुरानन ।
अस्य कवचस्य संप्रोक्ता ऋषयः सानगादयः ॥

अनुष्टुप्छन्दः श्चैव परब्रह्मादि दैवतम् ।
धर्मज्ञानार्थ सिद्ध्यर्थं विनियोगः परिकीर्तितः ॥

अस्य श्री विश्वकर्म परब्रह्म कवचमहामन्त्रस्य ।
सानगादि पञ्चऋषयः । अनुष्टुप् छन्दः । श्री विश्वकर्म परब्रह्म देवता ।
अं बीजं । क्लीं शक्तिः । ह्रीं कीलकं ।
मम धर्मार्थज्ञान सिद्ध्यर्थे जपे विनियोगः ।

श्लोकः -

विश्वकर्माः शिरः पातु ललाटं पातु मे मनुः ।
कालदेशं मयः पातु त्वष्टा नेत्रयुगं तथा ॥

शिल्पी गण्डद्वयं पातु दैवज्ञः पातुवोष्टकौ ।
अं बीजं वदनं पातः क्लीं बीजं कण्ठदेशकं ॥

ह्रीं बीजं हृदयं पातु चोदरं पातु महीश्वरः ।
ब्रह्मातु नाभिदेशंच मध्यं पातु मनोभवः ॥

कटथ्सौज्ञपतिः पातु पातु चोरूमहेश्वरः ।
जानुदेशेपरब्रह्म जङ्घे पातु विराट्प्रभुः ॥

पदौददेनोसदापातु सर्वाङ्गं विश्वकर्मकः ।
सद्योजात पुर्वदिशि वामदेवंतु दक्षिणे ॥

अघोरंपश्चिमेपातु तत्पुरुषंचोत्तरे तथा ।
ईशानं पातुचोर्ध्वायाधः पातुमहीश्वरः ॥

आग्नेयांपातुचेशानो नैऋत्यां गिरिजापतिः ।
वायव्येपातुमांधाता ईशान्येपातु विश्वभुक् ॥

पृथिव्यां सानगः पातु जलेपातु सनातनः ।
आकाशे चहभूनोमां पातुप्रत्नस्त्वसर्वतः ॥

सुपर्णः सर्वदा पातु सर्वसङ्कटनाशनः ।
य इदंब्रह्मकवचं त्रैलोक्याचापिदुर्लभम् ॥

शुचिर्भूत्वपठेनित्यं कवचं पापनाशनम् ।
भूतप्रेतपिशाचादि कूष्माण्डब्रह्मराक्षसः ॥

दिवाच रात्रि चरा महा भूतगणाः खगाः ।
सकृदुच्चारणाद्देव नाशंयातिनसंशयः ॥

महादरिद्रयुक्तोवा युक्तोवा सर्वपातकैः ।
मुच्यते सर्वपापेभ्यः श्रीमान्सुखीभवेत् ॥

गच्छेद्ब्रह्ममयं देहा विश्वकर्म मुजोदूतय ।
विश्वकर्माख्यकवचं यः पठेत्सततं नरः ॥

अन्नपानसदासष्टिः धनधान्यादि जायते ।
अनेन सद्दशीमन्त्रो न भूतो न भविष्यति ॥

जलंपिबेदुषःकाले नाभिमंगतिम् ।
बालग्रहामहारोगा नाशमायाति तक्षणात् ॥

संततिः कनकचायुरारोग्यैश्वर्यमङ्गलम् ।
कवचं यः पठेतस्य वर्द्धते शुक्ल चन्द्रवत् ॥

गुरुभक्ताय दातव्यं नाऽभक्ताय कदाचन ।
गुह्यात्गुह्यतरंगुह्यं गुणेरात्मप्रदर्शनम् ॥

इति विश्वसारोद्धारतन्त्रे शिवब्रह्मसंवादे विश्वकर्मपरब्रह्म कवच स्तोत्रं सम्पूर्णं ।

पूर्ण आनन्द लहरि

எண்ணா யிரத்தாண்டு யோகம் இருக்கினும்
கண்ணார் அமுதினைக் கண்டறி வாரில்லை
உண்ணாடிக் குள்ளே ஒளியுற நோக்கினால்
கண்ணாடி போலக் கலந்துநின் றானே

- திருமந்திரம் 603



Eight thousand years of yogA dear
Might not take you to Her near
Light you seek within you clear
Right like mirror you merge full gear